दिनाङ्क :- 20.05.2025 प्रात: - 06:55

## अथ वार्ता:

**शिवराज:-सिन्धुजलसन्धि:**

कृषिकृषककल्याणमन्त्री शिवराजसिंह-चौहान: प्रोक्तवान् यत् सिन्धुजलसन्धे: स्थगनेन जम्मूकश्मीर-राजस्थान-हरियाणा-पञ्जाब-हिमाचल-प्रदेशानां कृषका: लाभान्विता: भविष्यन्ति। नवदिल्ल्यां कृषकसमूहै: सह वार्तालापावधौ कृषिमन्त्री वक्तव्यमिदं प्रकाशितवान्। श्रीचौहान: प्रतिपादितवान् यत् भविष्ये अस्य जलस्योपयोगे एका व्यापकी रणनीति: निर्मास्यते। यस्तु अधिकतमजना: लाभान्विता: भवितुं शक्नुवन्ति। वार्तासमूहं एकं सम्बोधयन् श्रीचौहान: उक्तवान् यत् अस्य मासस्य च द्वादशदिनाङ्कपर्यन्तं एकं राष्ट्रव्यापी अभियानं विकसित-कृषि सङ्कल्पाभियानमिति उद्घाटयिष्यते। अस्य अभियानस्य प्रयोजनम् कृषकेभ्य: आधुनिक-प्राविधिकस्य नवीन-बीज-प्रकारकाणाञ्च विषये जागरूकताप्रदानमिति वर्तते।

**'मन की बात'-कार्यक्रम:**

प्रधानमन्त्री नरेन्द्रमोदी मेमासस्य पञ्चविंशतिदिनाङ्के स्वीये 'मन की बात' इत्येतस्मिन् कार्यक्रमे देशविदेशयो: जनै: साकं विचार-विनिमयं करिष्यति। 'मन की बात' इत्यस्य मासिक-कार्यक्रमस्य इदं द्वाविंशत्यधिकैकशततमं संस्करणं भविष्यति। जना: निजविचारान् अस्य मासस्य त्रयोविंशति दिनाङ्क पर्यन्तं माईगोव-नरेन्द्रमोदी-चलदूरभाषीय तन्त्राशयो: प्रेषितुं शक्नुवन्ति।

**विदेशसचिवसूचना**

विदेशसचिव: विक्रममिस्री इत्येष: संसदीय-स्थायि-समितये भारत-पाकिस्तान-देशयो: सम्बन्धे वर्तमान-विदेश-नीते: घटनाक्रमेषु सूचनां प्रदत्तवान्। असौ कांग्रेसदलस्य सांसदस्य शशिथरूरस्य अध्यक्षतासंवलितायै समितये सिन्दूराभियानस्य तदनन्तरं पाकिस्तानदेशेन सह सङ्घर्ष-विरामस्य घोषणाया: विषयेऽपि सूचनां प्रदत्तवान्। पहलगामातङ्क्याक्रमणे पाकिस्तानाधिकृतजम्मूकश्मीरे आतङ्कीस्थानेषु भारतस्य कार्याचरणस्य अनन्तरं विदेशनीते: घटनाक्रमेषु संसदीय-समितये प्रथमवारं केनापि शीर्षाधिकारिणा सूचना प्रख्यापितास्ति।

**शिवराजसम्मेलनम्**

कृषिकृषककल्याणमन्त्री शिवराजसिंह-चौहान: अद्य नवदिल्ल्यां कृषि-विश्वविद्यालयानां कुलपतिनाम् आई.सी.ए.आर्.-(ICAR) इत्येतेषां संस्थानानां निदेशकानां च वार्षिकं सम्मेलनम् उद्घाटयिष्यति। अस्य सम्मेलनस्य शीर्षको विद्यते- **कार्याचरणाय अभिसरणम्-सप्तचत्वारिंशदधिक-द्विसहस्रतम-वर्षपर्यन्तं विकसितभारताय कृष्यनुसन्धानशिक्षाया: प्रसारणम्** इति। सम्मेलनावधौ श्रीचौहान: भारतस्य दीर्घकालिकविकासाय राष्ट्रिय-कृष्यनुसन्धान-प्रणाल्या: पुनर्कल्पनायाम् एकस्या: उच्चस्तरीयसमित्या: अध्यक्षतामपि निभालयिष्यति।

**मुख्याधिकारी-मार्केट्सूचना**

गवर्नमेण्ट ई-मार्केट्प्लेस (जेम) इति विश्वस्य बृहत्तमेषु कुशल-सार्वजनिक-ई-क्रयण-मञ्चेषु उदीयमान: भवतीति। येन च प्रापण-सामर्थ्ययो: नवीन: मानक: स्थापित:। जीईएम्-इत्येतस्य मुख्यकार्यकारी-अधिकारी मिहिरकुमार: ह्य: गवर्मेन्ट्-ई-मार्केट्प्लेस इत्येतस्य अष्टमे निगमनदिवसावसरे नवदिल्ल्यां एकं पत्रकारसमूहं सम्बोधयन् वार्ताम् इमां कथितवान्।

**छगनभुजबल:**

राष्ट्रवादि-कांग्रेस-पार्टीति-दलीयो वरिष्ठनेता छगन-भुजबल: अद्य महाराष्ट्र-मन्त्रिमण्डले सम्मिलितो भविष्यति। शपथग्रहणसमारोह: एष: प्रात: दशवादने भविष्यति। आशास्यते यत् श्रीभुजबलाय खाद्यनागरिकापूर्ति-विभाग: प्रदास्यते अयं विभाग: तस्य पार्श्वे तदासीत् यदा एकनाथशिन्दे इत्येष: मुख्यमन्त्री आसीत्।

**ऋतुविभाग:**

भारतीय-ऋतु-विज्ञान-विभागेन आगामिनं दिनद्वयं यावत् कर्नाटक-राज्ये अत्यधिकवृष्टे: सम्भावना: समीक्ष्य तस्मै राज्याय नारङ्गवार्णिकी सञ्चेतना प्रसारिता। विभागेनानेन कर्नाटक-तमिलनाडु-कोंकण-गोवा-महाराष्ट्र-प्रदेशानां निकटवर्तिभ्य: क्षेत्रेभ्य: आगामिषु त्रिषु दिवसेषु अत्यधिकवृष्टे: असह्यानुमानम् अवलोक्य रक्तवार्णिकी जनसञ्चेतना प्रकटिता।

**आई.पी.एल्.-क्रिकेट**

इण्डियन्-प्रीमीयर-लीग-इत्येतस्यां क्रिकेट्-प्रतिस्पर्धा-मालिकायाम् ह्य: रात्रौ लखनऊनगरे क्रीडिते द्वन्द्वे सनराइजर्स-हैदराबाददलेन लखनऊ-सुपर-जायन्ट्स-दलं षड्स्तोभै: पराजितम्। अद्य दिल्ल्या: अरुणजेटलीक्रीडाङ्गणे चेन्नई-सुपर-किंग्स-दलस्य सामुख्यं राजस्थान-रॉयल्स-दलेन समम् सायंकाले सार्धसप्तवादने भविष्यति।

।। **इति वार्ता:**।।